# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2017 - '18

**Class : IX** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्ड: क - अपठित अवबोधनम् - 10
खण्ड: ख - रचनात्मक कार्यम् - 15
खण्ड: ग - अनुप्रयुक्त व्याकरणम् - 25
खण्ड: घ - पठित अवबोधनम् - 30

## खण्ड: क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अनुशासनस्य-पालनेनैव मानव: जीवने साफल्यमधिगच्छति। बाल्ये यौवने प्रौढत्वे वार्द्धक्ये चापि अनुशासनस्य आवश्यकता भवति। एवं हि गृहे विद्यालये सार्वजनिकसंस्थासु शासने सेनायां वा अनेन विना कार्यं न चलति। यदि छात्रा: विद्यालये अनुशासनस्य पालनं न कुर्यु: तदा तत्र अव्यवस्था भवेत् ।अद्यत्वे विद्यालयेषु महाविद्यालयेषु च सर्वत्रानुशानस्याभाव: दृश्यते। येन ता: संस्था: उपद्रवाणां कलहानां च केन्द्राणि जाता:। यदि शासने अनुशासनं न भवेत् तर्हि सर्वमपि राष्ट्रविश्रृंखलतां गच्छेत्। अत: आत्मन: देशस्य समाजस्य चौन्नत्यै अनुशासनं नितरामावश्यकम्।

**I. एकपदेन उत्तरयत।** **2**

i. नर: जीवने केन साफल्यमधिगच्छति?
ii. यदि छात्रा: अनुशासनं न पालयेत् तदा किं भवेत्?
iii. अद्यत्वे विद्यालयेषु महाविद्यालयेषु च सर्वत्र कस्याभाव: दृश्यते?
iv. आत्मन: देशस्य समाजस्य च उन्नत्यै कं नितराम् आवश्यकम्?

**II. पूर्णवाक्येन उत्तरयत।** **4**

i. अनुशासनस्य आवश्यकता कदा भवति?
ii. अनुशासनस्य अभावे शासने किं भवेत्?

**III. भाषिककार्यम्।** **2**

i. अधिगच्छति इत्यस्य क्रियापदस्य कर्तृपदं किम्?
(अनुशासनम्, जीवनम्, मानव:, पालनम्)

ii. अनावश्यकम् इत्यस्य विपर्ययपदम् अनुच्छेदे किं प्रयुक्तम्?
(नितराम्, उन्नतिः, आवश्यकम्, भवति)

iii. 'सर्वदा' इत्यस्मिन् अर्थे अत्र किं पदं प्रयुक्तम्?
(सर्वत्र, चापि, सर्वम्, नितराम्)

iv. 'अतः आत्मनः देशस्य समाजस्य' इत्यस्मिन् वाक्ये देशस्य पदस्य विशेषणपदं किम्?
(अतः, देशस्य, आत्मनः, समाजस्य)

**IV. अस्य अनुच्छेदस्य एकं समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख – रचनात्मक कार्यम्

**2. भवतः नाम अशोकः। भवान् भूकम्पपीडितान् सहायतां कर्तुमिच्छति। अत्र अधस्तात् मञ्जूषायां लिखितान् शब्दान् नीत्वा पत्रं पूरयन् लिखतु।** **5**

i. --------

दिनाङ्कः– 29-12-2017

प्रिय मित्र अमर,

ii. --------

मया तव मित्रेण रोहनेन iii. ------- यत् भवान् भूकम्पपीडितान् सहायतां कर्तुमिच्छति। अहमपि त्वया सह iv. -------- इच्छामि। अहम् v. -------- बहूनि वस्त्राणि च एकत्रीकृतानि। भवान् vi. -------- निश्चित्य vii. -------- कथयतु। viii. -------- चरणयोः मे ix. -------- निवेदयतु।

भवतः मित्रम्

x. --------

मञ्जूषा

| |
|---|
| स्वकार्यक्रमम्, प्रणामाः, गन्तुम्, मह्यम्, पञ्चसहस्ररूप्यकाणि, ज्ञातम्, दिल्लीतः, मधुरस्मृतिः, अशोकः, मातापित्रोः |

**3. चित्रं दृष्ट्वा मञ्जूषातः पदानि नीत्वा संस्कृते पञ्चवाक्यानि लिखत।** **10**



(ध्वनिविस्तारकयन्त्रम्, भाषणम्, नाटकम्, स्वच्छभारतम्, दर्शकाः, मालिन्यम्, मार्गे, बालकाः, मार्जनी)

अथवा

'गङ्गा नदी' इत्यस्मिन् विषये मञ्जूषातः पदानि नीत्वा संस्कृते पञ्चवाक्यानि लिखत।
(हिमालयात्, पवित्रा, नदी, हरिद्वारात्, सागरे, बंगप्रान्तं, सस्यश्यामलां, कृषिक्षेत्रम्, धार्मिकम्)

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**4. अधोलिखितयोः शब्दयोः उचितवर्णसंयोजनं विन्यासं वा कुरुत।** **2**

i. अ + म् + ऋ + त् + अ + म् = ---------------
(अमृतम्, अमतम्, अर्मतम्, अमर्तम्)

ii. पित्रिच्छा = -----------
(प्+इ+त्+र्+ई+च्+छ्+आ, प्+इ+त्+ई+र्+च्+छ्+आ, प्+इ+त्+र्+इ+च्+छ्+आ, प्+इ+त्+ऋ+इ+च्+छ्+आ)

**5. अधोलिखितप्रश्नानाम् उत्तराणि अधोदत्तैः उचितैः वर्णैः पूरयत।** **3**

i. अ, व्, स्, म् वर्णेषु कः वर्णः कण्ठ्यः भवति?
(अ, व्, स्, म्)

ii. वृथा इत्यत्र केवलं -------- वर्णस्य उच्चारणस्थानं मूर्धा अस्ति।
(व्, ऋ, थ्, आ)

iii. ------- वर्णस्य उच्चारणस्थानं दन्तोष्ठम् अस्ति।
(स्, श्, व्, च्)

**6. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा अधः दत्तानाम् पदानाम् सहायतया चित्वा लिखत।** **4**

i. जननी जन्मभूमिः च स्वर्गात् + अपि गरीयसि।
(स्वर्गादापि, स्वर्गातपि, स्वर्गादपि, स्वर्गातापि)

ii. सर्वाणि दुःखानि + अनुभूय एवं मा कथय।
(दुःखान्यनूभूय, दुःखान्यनुभूय, दुःखान्यनूभुय, दुःखन्यनुभूय)

iii. हास्यं जीवने महौषधिः इव भवति।
(मह + औषधिः, महा + ओषधिः, मह् + औषधिः, महौ + ओषधिः)

iv. मनोरमा अद्यैव पत्युर्गृहम् अगच्छत्।
(पत्युर् + गृहम्, पति + उगृहम्, पत्यू + गृहम्, पत्युः + गृहम्)

**7. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** **4**

i. रामायणस्य ------- नाम महर्षिः वाल्मीकिः।
(रचयिता, रचयित्रा, रचयितुः, रचयितम्)

ii. --------- सम्पूज्य बालिका प्रसन्ना अस्ति।
(जनन्याम्, जननीम्, जनन्यै, जननी)

iii. देशस्य सुरक्षा --------- परमं कर्त्तव्यम्।
(मह्यम्, मम, अस्मान्, अस्माकम्)

iv. एतेषु -------- तुभ्यं किं रोचते?
(वस्तूनि, वस्तुषु, वस्तुभ्यः वस्तुभिः)

**8. अधोलिखित वाक्येषु कोष्ठके प्रदत्तधातूनां क्रियापदानां समुचितपदं किं भविष्यति?** **4**

i. वयम् इदं कार्यं कर्तुं ---------। (शक्, लट् लकारे)
(शक्नुमः, शक्नोति, शक्नुवः, शक्नुवन्ति)

ii. गुरुः छात्रेभ्यः --------- । (क्रुध् लृट् लकारे)
(क्रुध्यति, क्रोत्स्यति, क्रुध्येत, क्रोध्यति)

iii. यूयम् एतेषां प्रश्नानाम् उत्तरं --------। (लिख्, लोट् लकारे)
(लिखन्तु, लिख, लिखत, लिखथ)

iv. शोभनः पुत्रः भक्त्या पितरं --------। (सेव् विधिलिङ् लकारे)
(सेवेत, सेवेरन्, सेवेयाताम्, सेवताम्)

**9. प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत।** **4**

i. ------- उभयतः वृक्षाः सन्ति।
(नद्याः, नद्ये, नद्यै, नदीम्)

ii. अम्बा ------- स्निह्यति।
(शिशुः, शिशुना, शिशौ, शिशुम्)

iii. छात्रैः ------- न प्रमदितव्यम्।
(पठने, पठनस्य, पठनाय, पठनात्)

iv. भारतीय वीरः -------- अलम्।
(शत्रुणा, शत्रुभ्यः, शत्रौ, शत्रुम्)

**10. प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत।** **4**

i. राधा विहस्य पुत्रं वदति।
(वि+हस्+ल्यप्, वि+हस्+य्, व्+इ+हस्+यप्, विहस्+ल्यप्)

ii. बालकः कवितां स्मृत्वा गायति।
(सम्र + क्त्वा, स्मृ + क्त्वा, स्मृ + त्वा, स्मर् + क्त्वा)

iii. बालः विद्यालयं गम् + तुमुन् सज्जः भवति।
(गम्तुम्, गङ्तुम्, गन्तुम्, गन्तुमुन्)

iv. रमा मातरं प्र + नम् + ल्यप् विद्यालयं गच्छति।
(प्रनम्य, प्रनमय, प्रणम्य, प्रणाम्य)

## खण्डः घ - पठित अवबोधनम्

**11. अधोलिखितम् गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशम्।**

राज्ञः जनकस्य अनुमत्या अष्टावक्रः पण्डितैः सह शास्त्रार्थं कृत्वा तान् अजयत्। अष्टावक्रस्य आत्मज्ञानं शास्त्रपाण्डित्यं बुद्धिपाटवं संयमादिगुणजातं च निरीक्ष्य राजर्षिः जनकः प्रभावितः भूत्वा तस्मै निवेदितवान् – "भगवन् अहं भवद्दर्शनैः आत्मानं धन्यं मन्ये। इच्छामि भवद्भ्यः किञ्चित् दातुम्"। अष्टावक्रः प्रत्यवदत् "यदि भवान् इच्छति तदा यद् वस्तु भवदीयम् अस्ति, तत् मह्यम् अर्पय"।

**I. एकपदेन उत्तरयत।** **2**

i. अष्टावक्रः कैः सह शास्त्रार्थं अकरोत्?

ii. शास्त्रार्थे कः अजयत्?

**II. पूर्णवाक्येन उत्तरयत।** **2**

राजर्षिः जनकः अष्टावक्राय किं न्यवेदयत्?

**III. भाषिककार्यम्।** **2**

i. निवेदितवान् अत्र कः प्रत्ययः प्रयुक्तः?
(क्तवतु, मतुप्, क्त्वा, ल्यप्)

ii. दृष्ट्वा इत्यस्मिन् अर्थे अत्र कः शब्दः प्रयुक्तः?
(कृत्वा, भूत्वा, निरीक्ष्य, दातुम्)

iii. मन्ये इति क्रियापदस्य कर्तृपदं किम्?
(भवत्, जनकः, अष्टावक्रः, अहम्)

iv. किञ्चित् अस्य पदस्य सन्धिच्छेदं कथं भवति?
(किञ्च + इत्, किं + चित्, किम् + चित्, किञ्चि + त्)

**आ. पद्यांशम्।**

काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति ॥

**I. एकपदेन उत्तरयत।** **2**

i. मथ्यमानात् काष्ठात् कः जायते?

ii. खन्यमाना भूमिः किं ददाति?

**II. पूर्णवाक्येन उत्तरयत।** **2**

केषां नराणां कृते किम् असम्भवं नास्ति?

**III. भाषिककार्यम्।** **2**

i. काष्ठादग्निर्जायते अस्य पदस्य सन्धिच्छेदं कथं भवति?
(काष्ठाद् + अग्निर्जायते, काष्ठात् + अग्निः + जायते, काष्ठाः + दग्निः + जायते, काष्ठातग्निः + जायते)

ii. फलन्ति इति क्रियापदस्य कर्तृपदं किम्?
(सर्वयत्ना, मार्गारब्धाः, नराणाम्, असाध्यम्)

iii. अम्बु: इत्यस्मिन् अर्थे अत्र क: शब्द: प्रयुक्त:?
(नर:, अग्नि:, तोयम्, भूमि:)

iv. नास्त्यसाध्यम् इत्यत्र क: सन्धि:?
(दीर्घसन्धि:, गुणसन्धि:, यण् सन्धि:, वृद्धिसन्धि:)

**इ. नाट्यांशम्।**

प्रथम: भिल्ल:– हा धिक्! कीदृश: समय:आगत:। देशभक्त: प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थित:।

द्वितीय: भिल्ल:– न जाने अस्य मेवाडदेशस्य भाग्ये किं लिखितम्? हा निष्ठुर: दैव:! देशभक्ते तु दयस्व।

तृतीय: भिल्ल:– वराकोऽयं जीवनसामाग्रीयुद्धसामाग्र्यो: अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमे: दुर्दशां स्वचक्षुषा कथं द्रक्ष्याम:?

(सर्वे भिल्ला: विलपन्ति)

एक: सैनिक:– हा दैव! कथं देशधर्मौ प्रति निष्ठुर: सञ्जातोऽसि? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

सर्वे सैनिका:– परतन्त्रे देशे जीवनं नरकायते। न शक्नुम: प्राणान् धारयितुम्।

**I. एकपदेन उत्तरयत।** **2**

i. देशधर्मौ प्रति क: निष्ठुर: सञ्जात:?

ii. परतन्त्रे देशे किं नरकायते?

**II. पूर्णवाक्येन उत्तरयत।** **2**

प्रताप: कयो: अभावेन खिद्यते?

**III. भाषिककार्यम्।** **2**

i. प्रस्थित: इत्यत्र क: प्रत्यय: प्रयुक्त:?
(क्तवतु, क्त्, तसिल्, तुमुन्)

ii. हा निष्ठुर: दैव:! देशभक्ते तु दयस्व। इत्यत्र क: निष्ठुर: कथित:?
(देशभक्त:, दयस्व, दैव, सैनिक:)

iii. 'वधं कुरु' इत्यस्मिन् अर्थे अत्र क: शब्द: प्रयुक्त:?
(निष्ठुर:, जहि, शक्नुम:, सञ्जात:)

iv. मातृभूमे: दुर्दशां स्वचक्षुषा कथं द्रक्ष्याम:? अस्य वाक्यस्य कर्तृपदं किम्?
(भिल्ल:, अहम्, सैनिक:, वयम्)

**12. निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुन: लिखत।** **4**

मञ्जूषा

| गुणग्राही, हेतो:, धर्मव्यथां, पुण्येन, विद्वान्, फलावलीनां, वदान्यगुरवे, शुचि: |
|---|

क. धत्ते भरं कुसुमपत्रफलावलीनां धर्मव्यथां वहति शीतभवां रुजं च।
यो सर्वमर्पयति चान्यसुखस्य हेतो:, तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥

अन्वयः– य: कुसुम–पत्र i. -------- भरं धत्ते, (य:) ii. ------- शीत भवां च रुजं वहति, (य:) च अन्यसुखस्य iii. -------- सर्वम् अर्पयति, iv. -------- तस्मै तरवे नमः अस्तु।

ख. क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते।
अनुकूल:शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः ॥

अन्वयः– क्षमी दाता i. -------- स्वामी ii. -------- लभ्यते अनुकूल: iii. -------- दक्ष: iv. -------- कवि: सुदुर्लभ:।

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

i. भारतं भारत्याः वीणायाः झंङ्कृतैः झंङ्कृतम् अस्ति।

ii. जलमूलम् अन्विष्यता मुनिना आह्लादकरः शब्दः श्रुतः।

iii. ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः।

iv. ततः ते श्रेयः भविष्यति।

**14. अधोखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत।** **4**

i. न नक्तं दधि भुञ्जीत।
(सन्ध्याकाले, रात्रौ, प्रभाते)

ii. संक्रान्तं यत्र ते रूपमादर्श इव तिष्ठति।
(द्रष्टुम् इव, आदर्शः इव, दर्पणम् इव)

iii. ते उपाध्यायात् अतिशयः प्राप्तः।
(आधिक्यम्, अतिशयनम्, निपुणः)

iv. स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्।
(जलम्, प्रेमम्, तैलम्)